## चूर्णादीन्यप्राणिषष्ठ्याः । (१३४/३८६८)

[1]उत्तरपदादिः इति वर्तते, तत्पुरुषे इति च । चूर्णादीनि उत्तरपदानि [2]अप्राणिवाचिनः षष्ठ्यन्तात् पराणि तत्पुरुषे समासे आद्युदात्तानि भवन्ति । मुद्गचूर्णम् । मसूरचूर्णम् । अप्राणिषष्ठ्याः इति किम् ? मत्स्यचूर्णम् । [3]षष्ठ्याः इति किम् ? परमचूर्णम् ।

चूर्ण । [4]करिप । करिव । शाकिन । शाकट । द्राक्षा । तूस्त । [5]कुन्दम । दलप । चमसी । [6]चक्कन । चौल । चूर्णादिः ।

'चूर्णादीन्यप्राण्युपग्रहात्' इति सूत्रस्य पाठान्तरम् । तत्रोपग्रहः इति षष्ठ्यन्तमेव पूर्वाचार्योपचारेण गृह्यते ॥

## षट् च काण्डादीनि । (१३५/३८६९)

षट् पूर्वोक्तानि काण्डादीनि उत्तरपदानि अप्राणिषष्ठ्या आद्युदात्तानि भवन्ति । काण्डं गर्हायाम् (६.२.१२६/३८६०) इत्युक्तम्, अगर्हायामपि भवति । दर्भकाण्डम् । [7]शरकाण्डम् । 'चीरमुपमानम्' (६.२.१२७/३८६१) इत्युक्तम्, [8]अनुपमानमपि भवति । दर्भचीरम् । कुशचीरम् । 'पललसूपशाकं मिश्रे' (६. २. १२८/३८६२) इत्युक्तम्, अमिश्रेऽपि भवति । तिलपललम् । [9]मुद्गसूपः । मूलकशाकम् । 'कूलं सञ्ज्ञायाम्' (६. २. १२९/३८६३) इत्युक्तम्, असञ्ज्ञायामपि भवति । नदीकूलम् । समुद्रकूलम् । षट् इति किम् ?[10] राजसूदः[11] ॥

## कुण्डं वनम् । (१३६/३८७०)

कुण्डशब्दोऽत्र कुण्डसादृश्येन वने वर्तते । कुण्डम् इत्येतत् उत्तरपदं [12]वनवाचि तत्पुरुषे समासे आद्युदात्तं भवति । दर्भकुण्डम् । शरकुण्डम् । वनम् इति किम् ? मृत्कुण्डम् ॥

## प्रकृत्या भगालम् । (१३७/३८७१)

[13]भगाल[14]वाच्युत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । कुम्भीभगालम् । कुम्भीकपालम् । कुम्भीनदालम् । भगालादयो मध्योदात्ताः । प्रकृत्या [15]इत्येतदधिकृतम् 'अन्तः' (६.२.१४३/३८७७) इति यावद् वेदितव्यम्[16] ॥

## शितेर्नित्याबह्वज्बहुव्रीहावभसत् । (१३८/३८७२)

शितेः उत्तरपदं नित्यं यदबह्वज् भसच्छब्दवर्जितं बहुव्रीहौ समासे तत् प्रकृतिस्वरं भवति । [17]शितिपादः । शित्यंसः । 'शित्योष्ठः' (तै. सं. ५. ६. १४. १) । पादशब्दो वृषादित्वाद् आद्युदात्तः । अंसौष्ठशब्दौ च प्रत्ययस्य नित्त्वात् । शितेः इति किम् ? दर्शनीयपादः । नित्यग्रहणं किम् ? 'शितिककुत्' (तै.सं. ५.६.१४.१) [18]ककुदस्यावस्थायां लोपो विधीयते । तत्रावस्थाया अन्यत्र शितिककुद इति बह्वजुत्तरपदं भवति इति [19]तेन न नित्याबह्वच् । अबह्वच् इति किम् ? शितिललाटः । बहुव्रीहौ इति किम् ? शितेः पादः शितिपादः । अभसत् इति किम् ? 'शितिभसद्' (तै.सं. ५.६.१४.१) । शितिशब्द आद्युदात्तः । पूर्वपदप्रकृतिस्वरापवादो योगः ॥

---

1. वाक्यमिदं नास्ति फ. 2. अप्राणिषु फ. 3. वाक्यमिदं नास्ति फ. 4. कपि ह. 5. कुन्दकुम ड, कुन्दुम ह. 6. चन्दन फ, चक्वण ड, नास्ति क. 7. शरकाण्डम् नास्ति फ. 8. अनुपमानेऽपि ह. 9. मुद्गपलालम् फ. 10. राज्ञः सूदः इत्यधिकम् ह. 11. अप्राणिषष्ठ्या इति किम् ? देवदत्तकाण्डः इत्यधिकम् ब. काण्ड चीर पलल सूप शाक कूल इति काण्डादिः इत्यधिकम् ड. 12. वनवाचिनि ह. 13. उत्तरपदग्रहणं तत्पुरुष इति वर्तते । आदिरुदात्तः इति निवृत्तम् इत्यधिकम् ह. 14. भगालवाचिनि ह. 15. इत्यधिकारः ह. 16. प्रकृत्यङ्गाधिकारात् इत्यधिकम् ह. 17. शितिः पादौ यस्य इत्यधिकम् ह. 18. ककुदशब्दस्य फ. 19. तेन नास्ति फ.